संस्कृतवर्षस्मृतिग्रन्थमाला-४

प्रधानसम्पादकः

प्रो० वेम्पटि कुटुम्बशास्त्री

डॉ० प्रतिभारायविरचिता

# याज्ञसेनी

(उत्कलभाषानिबद्धो ज्ञानपीठ-
मूर्त्तिदेवीपुरस्कारसभाजित उपन्यासः)



संस्कृतानुवादकः

भागीरथिनन्दः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# आमुखम्

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति सूक्तिमिमां क्वचित् प्रतीकरूपेण प्रच्छन्नविषयोपन्यासेन पुरस्करोति 'याज्ञसेनी'त्युपन्यासः। समग्र उपन्यासः प्रस्तुतः समाजे विविधभूमिकावतीर्णया याज्ञसेन्या द्रौपद्या कयाचिद् नार्यन्यतमया। उपन्यासेऽस्मिन् भगवन्तं श्रीकृष्णं प्रति निवेदिते पत्ररूपे औपन्यासिकया श्रीमत्या प्रतिभारायमहाभागया काले काले नारीजीवनस्य सकला समस्या, समस्ता चान्तर्वेदना द्रौपदीमुखेन उपस्थापिते महाभारतीयकथामनुसृत्य।

समाजो नारीपुरुषयोर्महासङ्गमः। एकमन्तराऽपरोऽपूर्णोऽस्थिरश्च। किं बहुना, संसारस्य संरचना द्वयोः सहगामितया सम्भवति, न तु एकमात्रस्य प्रयासेन। तत्र पुनः पुरुषकर्त्तृका नारीलाञ्छना सन्ततं निन्दनीया, किञ्चान्त्ये कवलीकरोति समग्रं समाजं, महाभारतमहासमरो यस्य प्रमाणम्। नारी-मानवतापमानो नाशयति जातिं, सभ्यतामपि।

आत्मसमप्रणमपि विषयान्तरमस्योपन्यासस्य। कस्मैचित् समर्पिते आत्मानि न देहगेहज्ञानं, तदवभासेन च सर्वतोऽभयं, प्रशान्तिश्च प्रसरतः। सोऽयमात्मविनिवेदनसिद्धान्त इह विविधप्रसङ्गोपस्थापनेन प्रदर्शित उपन्यासे। अत्र परममङ्गलमयो कृष्ण एव भगवान्, तस्मै चात्मसमप्रणं पञ्चपतिनायिकायाः पाञ्चाल्याः येन जीवनस्य चरमविपद्दशायां भरत-वंशराजसभायां राजवध्वाःद्रौपद्यः विवसनकरणकालेऽपि कृष्णसहायतया चरमलज्जाया मुक्तिः, समाजे न्यायधर्मं प्रति आस्था च। विषयाणां चारुसन्निवेशकारणात्, उच्छ्वसितभावावेगपरिकल्पनया, अविकल-हृदयङ्गमवातावरणनिर्मितेश्च सद्यः पाठकहृदयावर्जकतया ओडिआभाषया

सारिका नीलमणिः गतरात्रौ नितम्बिन्या सह मे कथोपकथनं निशम्य कृष्णनामभजनमारब्धवती। जाने, सा कृष्णाया अन्तःस्वरं स्वकाकल्या प्रतिध्वनयतीति।

रत्नपञ्जरमुद्घाट्य नीलमणिं प्रेम्णा हस्तादरं नीतवती। तत्कण्ठ-स्वरात् स्वस्वरं कोमलतरीकृत्यावदम्—"नीलमणे!" साऽभजत्—कृष्ण-कृष्ण-कृष्ण। अहं पुनर्मधुरस्वरेणावदम्—"नीलमणे!"

—कृष्ण-कृष्ण।

—नीलमणे!

—कृष्ण-कृष्ण।

अहं तां यावदाकारयामि, सा कृष्णनाम्ना तावत् प्रत्युत्तरति। यथा नीलमणिं प्रति मम स्नेहस्य समुचितं प्रतिदानं हि तदीयः कृष्णनामजपः। यतोहि सम्प्रति कृष्णनाम मामधिकमानन्दयति। परन्तु, अद्य नीलमणि-रवागच्छदिदं कुतः ?

अहं कृत्रिमरोषं प्रकटयन्त्यवदम्—"नीलमणे! तूर्ष्णीं भव। साऽपि मां परिहसन्तीवाब्रवीत्—"कृष्ण-कृष्ण"।

—"तूष्णीमाचर नीलमणे!"

—"कृष्ण-कृष्ण।"

—"अहह, मां मतिभ्रष्टां सम्पादयसि किम् ?"

पृष्ठे काऽपि कलकलं हसति। तया सह नीलमणिरपि। सखी नितम्बिनी पृष्ठत उपस्थिता। ममोन्मुक्तकवरीं सज्जयन्ती साऽऽह—"प्रातःकालात् कृष्णनामजपमारब्धवती! सम्पूर्णो दिवसो यदवशिष्टः!